श्रीवाल्मीकिमहामुनिप्रणीतं

# रामायणम्

रामप्रणीत-रामायणतिलक, शिवसहायप्रणीत-रामायणशिरोमणि, गोविन्दराजप्रणीत-रामायणभूषणेति टीकात्रयेणोपस्कृतम्।

तच्च

कड्डुपि- श्रीनिवासशास्त्रिभिः, [illegible], [illegible] संस्कृतम्।

राष्ट्रिय-संस्कृत-संस्थान

नई दिल्ली

पुस्तकमिदं राष्ट्रियसंस्कृतसंस्थानस्य पुनर्मुद्रणयोजनायां प्रकाशितम्।

श्रीवाल्मीकिमहामुनिप्रणीतं

# रामायणम्

रामप्रणीत-रामायणतिलक, शिवसहायप्रणीत-रामायणशिरोमणि, गोविन्दराजप्रणीत-रामायणभूषणेति टीकात्रयेणोपस्कृतम्।

तच्च

कट्टिभिः श्रीनिवासशास्त्रिभिः संशोधितपाठान्तरैः टिप्पण्यादिभिश्च समलंकृतम्।

तथा

सातकडिमुखोपाध्यायशर्मणा विनिर्मिता विशदभूमिकया श्लोकानुक्रमण्या च सनाथीकृतम्

प्रथमो भागः

(बालकाण्डम्)

राष्ट्रिय-संस्कृत-संस्थान

मानित विश्वविद्यालय

५६-५७, इन्स्टीटयूशनल एरिया,

जनकपुरी, नई दिल्ली-११००५८

# प्रस्तावना

यावत् स्थास्यन्ति गिरयः सरितश्च महीतले ।
तावद् रामायणकथा लोकेषु प्रचरिष्यति ।।[1]

नेयं कविगुरोर्दम्भोक्तिरपि तु त्रिकालाबाधितदृष्टेर्महर्षेर्भूतार्थकथनमिदम् । अन्यूनद्विसहस्र-वर्षेभ्यो न केवलं भारते वर्षे अपि तु द्वीपान्तरेष्वनेकेष्वियं रामायणकथाऽऽपामरप्रेक्षावज्जननिर्विशेषं मनुष्यहृदयानि आवर्जयति । सेयं रामकथा महर्षिणा प्राचेतसेन वाल्मीकिना रामायणे महाकाव्य उप-निबद्धाऽद्यापि सहृदयैर्धर्मार्थकाममोक्षार्थिभिरितिवृत्ततत्त्वानुसन्धित्सुभिः समाजशास्त्रजिज्ञासुभिश्च सानु-रागं सश्रद्धं सकौतुकं च परिशील्यते । विश्वस्मिन् लौकिकवाङ्मये न दृश्यते ग्रन्थान्तर यस्य जनानां चरित्रे चिन्तने च इयान् गभीरः प्रभावोऽनुभूयेतेति युक्तमेवाह विपश्चिन्माकेदोनेल महोदयः ।[2] श्रीमद्विवेकानन्दस्वामिपादा अपि रामायणं महाभारतं च प्राचीनार्यज्ञानस्य विश्वकोशौ समुन्नतममानव-संस्कृतेराधारौ च मन्वते ।[3]

श्रीमद्वाल्मीकिरचितं रामायणमिदं वाङ्मयप्रकारेषु कतमस्मिन्नन्तर्भवतीति जिज्ञासायां बहु वक्तव्यं विमर्शनीयं च वर्तते । प्रतीच्याः समीक्षका रामायणं (तथैव महाभारतमपि) Epic-नाम्ना व्यपदिशन्ति, epic-शब्दस्य भारतीयभाषासु महाकाव्यमिति रूपान्तरमपि अद्यत्वे प्रसिद्धम् । अतएव रामायणमपि महाकाव्यत्वेनैव निर्दिश्यते । अत्र केचन प्रश्नाववतिष्ठन्ते—यवनमहाकविहोमेरनिर्मिते 'इलिआद'-'ओदिसी'-इत्याख्ये महाकाव्ये तथा रोमकमहाकवि-वेर्गिल-निर्मितम् 'ईनिद' महा-काव्यं च पाश्चात्यकाव्यशास्त्रोक्तलक्षणानुसारं epic-पदवाच्यानि, रामायणे तादृशं epic-लक्षणं न संगच्छते; epic-संज्ञकं काव्यं वीररसप्रधानं च भवति, रामरावणयोर्युद्धवर्णनसत्त्वेऽपि रामायणं न

1. रामायणम् I. 2. 36-37
2. "Probably no work of world literature, secular in origin, has ever produced so profound an influence on the life and thought of a people as the Rāmāyaṇa."
—A. A. Macdonell in Encyclopaedia of Religion and Ethics, vol. x, p. 574.
3. "In fact, the Ramayana and the Mahabharata are the two encyclopaedias of the ancient Aryan life and wisdom, portraying an indeal civilization which humanity has yet to aspire after."—The Complete Works of Swami Vivekananda, 10th ed., Advaita Ashrama, Almora, 1972, vol. 4, p. 101,

**को न्वस्मिन्सांप्रतं लोके गुणवान्कश्च वीर्यवान् । धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः ॥ २ ॥**

जिमथ्मुपाम्' इत्यादिना प्रच्छेर्द्विकर्मकत्वम्। परिपप्रच्छेति परोक्षे लिट् । प्रश्नस्य परोक्षत्वं विवक्षितभगवद्गुणानुसंधानकृतवैचित्त्यात्सुप्तोऽहं किल विललापेतिवत् । विभक्तिप्रतिरूपकमव्ययं वा । स्वविनयव्यञ्जनाय प्रथमपुरुषनिर्देशो वा 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति' इतिवत् । स्वस्मिन्नन्यत्वमारोप्य परोक्षनिर्देशो वा । अनेन "परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन । तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् । तस्मै स विद्वानुपसन्नाय सम्यक्प्रशान्तचित्ताय शमान्विताय । येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्" इत्याथर्वणिकी श्रुतिर्गुरूपसदनविषयोपबृंह्यते ।

तथाहि तपस्वीत्यनेन परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायादित्यस्यार्थोऽदर्शि । अधीतसाङ्गसशिरस्कवेदोधिगताल्पास्थिरफलकेवलकर्मज्ञानतया संजातमोक्षाभिलाषो हि तपस्विशब्दार्थो वर्णितः । वाल्मीकिरित्यनेन सम्यक्प्रशान्तचित्ताय शमान्वितायेत्यस्यार्थो दर्शितः । स्वाध्यायनिरतमित्यनेन श्रोत्रियपदार्थ उक्तः "श्रोत्रियंश्छन्दोऽधीते" इति श्रोत्रियशब्दार्थप्रकाशनात् । वाग्विदां वरमित्यनेन विद्वच्छब्दार्थः । मुनिपुंगवमित्यनेन ब्रह्मनिष्ठशब्दार्थः । नारदशब्देन गुरुशब्दार्थः । 'गुशब्दस्त्वन्धकारः स्याद्रुशब्दस्तन्निरोधकः । अन्धकारनिरोधित्वाद्गुरुरित्यभिधीयते' इति तन्निरुक्तिः । परिपप्रच्छेत्यनेन तद्विज्ञानार्थं स गुरुमेवाभिगच्छेदित्येतदुपपादितम् । "विधिवदुपसन्नः पप्रच्छ" इति श्रुतेः । अत्र ब्रह्मवाचितपःशब्दप्रयोगेण देवतानमस्काररूपं मङ्गलमाचरितम् । तथोक्तम् अइति भगवतो नारायणस्य प्रथमाभिधानमभिदधता किं नाम मङ्गलं न कृतमिति । 'देवतावाचकाः शब्दा ये च भद्रादिवाचकाः । ते सर्वे मङ्गलार्थाः स्युर्लिपितो गणतोऽपि च' इति । निरन्तरनिरतिशयानन्दरूपं तपो ज्ञानरूपं ब्रह्म स्वाध्याय सुष्ठु ध्यात्वेरि वा देवतानमस्कारः गुरुनमस्कारश्च कृतो भवति । कथं तपःसु नि- र.तं नारदमाध्याय परिपप्रच्छेति । यद्वा परि पूजयित्वेत्यर्थः । 'परिः समन्ततो भावव्याप्तिदोषकथासु च । भाषाश्लेषे पूजने च वर्जने वचने शुभे' इतिवचनात् । नारदं संपूज्य पप्रच्छेत्यर्थः । 'पराशरं मुनिवरं कृतपौर्वाह्णिकक्रियम् । मैत्रेयः परिपप्रच्छ प्रणिपत्याभिवाद्य च' इतिवत् । अस्य श्रीरामायणस्य गायत्र्यक्षरसंख्यानुसारेण चतुर्विंशतिसहस्रग्रन्थसङ्ख्यया प्रवृत्तत्वात् प्रथमसहस्रोपक्रमे तकारः प्रयोक्तव्य इति सत्स्वपि ब्रह्मवाचकेषु शब्दान्तरेषु तपःशब्दस्यैव प्रयोगः । प्रबन्धादौ तकारप्रयोगश्चावश्यकः । तस्य वक्तुर्वाचकस्य च सौख्यकरत्वात् । तथोक्तम् 'वस्तुलाभकरो णस्तु तकारः सौख्यदायकः' इति । साहित्यचूडामणौ तु 'तकारो विघ्ननाशकः' इत्युक्तम् । किंच तकारस्य जलं भूतं बृहस्पतिर्देवता । अतः शुभावहोऽनेन प्रबन्धारम्भः । अत एवोक्तं चमत्कारचन्द्रिकायाम् 'वर्णानामुद्भवः पश्चाद्व्यक्तिः सङ्ख्या ततः परम् । भूतवीजविचारश्च ततो वर्णग्रहा अपि' इत्यारभ्य 'एतत्सर्वमविज्ञाय यदि पद्यं वदेत्कविः । केतकारूढकपिवद्भवेत्कण्टकपीडितः' इति । 'कारणात्पञ्चभूतानामुद्भूता मातृका यतः । अतो भूतात्मका वर्णाः पञ्चपञ्चविभागतः ॥ वाय्वग्निभूजलाकाशाः पञ्चाशल्लिपयः क्रमात् । पञ्च ह्रस्वाः पञ्च दीर्घा बिन्द्वन्ताः सन्धयस्तथा ॥ तत्र स्वरेशः सूर्योऽयं कवर्गेशस्तु लोहितः । चवर्गप्रभवः काव्यष्टवर्गोद्बुधसंभवः ॥ तवर्गोत्थः सुरगुरुः पवर्गोत्थः शनैश्चरः । यवर्गजोऽयं शीतांशुरिति सप्तग्रहाः क्रमात्' इति ॥ अत्र तपःस्वा इति यगणः आदिलघुत्वात् । तदुक्तम् 'आदिमध्यावसानेषु यरता यान्ति लाघवम् । भजसा गौरवं यान्ति मनौ तु गुरुलाघवम्' इति । यगणप्रयोगश्चार्थकर इत्युक्तं चमत्कारचन्द्रिकायाम् 'करोत्यर्थानादिलघुर्यगणो वायुदैवतः' इति । ननु तपस्तापः सुतरामाधिः स्वाधिस्तयोराये निरतमिति ग्रन्थारम्भे अश्लीलवचनमनुचितम् । तदुक्तम् 'अश्लीलं तदमाङ्गल्यं जुगुप्साव्रीडभीकरम्' इति । मैवम् । प्रसिद्धिविशेषेण तपोवेदयोरेव प्रथमतरं बुद्ध्यारोहेणाश्लीलत्वप्रसङ्गाभावात् । यथा भगिनीलिङ्गादिप्रयोगेषु । अत्र सर्वत्र प्रायेण पथ्यावक्त्रं वृत्तम् । तदुक्तं वृत्तरत्नाकरे 'युजोर्जेन सरिद्भर्तुः पथ्यावक्त्रं प्रकीर्तितम्' इति । वृत्तविशेषास्तु तत्र तत्र वक्ष्यन्ते । अत्र वृत्त्यनुप्रासः शब्दालंकारः तकारादीनामावृत्तेः । तदुक्तं काव्यप्रकाशे 'वर्णसाम्यमनुप्रासः' इति । विशेषणानां साभिप्रायत्वात्परिकरो नामार्थालंकारः । उक्तमलंकारसर्वस्वे 'विशेषणानां साभिप्रायत्वे परिकरः' इति । तपःस्वाध्यायनिरतत्वादीनां गुरूपसत्तिहेतुज्ञानानुष्ठानप्रतिपादकत्वात् पदार्थहेतुकं काव्यलिङ्गमलंकारः । 'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमलंकृतिः' इतिलक्षणात् । अत्र वाल्मीकिनारदयोः स्वरूपकथनेन शिष्याचार्याभ्यामेवं भवितव्यमिति द्योतनाद् वाक्यगतवस्तुना वस्तुध्वनिः ॥ १ ॥

२ ] ति० टी०—अथ प्रश्नमभिनयति—को न्विति । नुशब्दो वितर्के । सांप्रतं वर्तमानकालेऽस्मिँल्लोके भूलक्षणे को नु गुणवान् । प्रशस्तबहुगुणवानित्यर्थः । भूमप्रशंसादौ मतुप् । अस्यैव प्रपञ्चः कश्च वीर्यवानित्यादि । दिव्यास्त्रबलादिजशक्तिविशेषेण पराभिभवसामर्थ्यं वीर्यं तद्वान् । कश्च श्रौतस्मार्तसकलधर्मरहस्यज्ञः । बह्वीमप्यपकृतिमुपेक्ष्यैकामप्युपकृतिं बह्वीं मन्यत इति कृतज्ञः । सत्यवाक्यः सर्वावस्थास्वपि यथाश्रुतदृष्टतत्त्वार्थवक्ता । दृढव्रतः आपद्यपि धर्माय परिगृहीतव्रतविशेषस्य त्यागरहितः ॥ २ ॥

रा० टी०—प्रश्नाकारमाह—को न्वस्मिन्नित्यादिभिः । अस्मिन् लोके सांप्रतमस्मिन्काले गुणवान् अतिशयसौशील्यादिमान् कोऽस्ति अस्तीत्यध्याह्रियते । यत्र क्रियान्तरं न श्रूयते तत्राऽस्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽपि प्रयुज्यते इति भाष्योक्तेरस्तेः सर्वत्र संबन्धो बोध्यः । तत्र भवन्तीति लटः संज्ञा । वीर्यवान् अतिशयपराक्रमवाँश्च कः । धर्मज्ञः अतिशयधर्मज्ञाता च कः । कृतज्ञः कृतं कथंचिज्ज्ञातोपकृतिमेव जानाति स्मरति नानन्तरजाताऽपकृतिगणं जानातीति । कृतज्ञश्च कः वक्ष्यति च 'कथंचिदुपकारेण कृतेनैकेन तुष्यति । न स्मरत्यपकाराणां शत-

श्रीवाल्मीकिमहामुनिप्रणीतं

# रामायणम्

रामप्रणीत-रामायणतिलक, शिवसहायप्रणीत-रामायणशिरोमणि,
गोविन्दराजप्रणीत-रामायणभूषणेति टीकात्रयेणोपस्कृतम्।

तथा

कद्विभिः श्रीनिवासशास्त्रिभिः संशोधितपाठान्तरैः टिप्पण्यादिभिश्च समलंकृतम्।

राष्ट्रिय-संस्कृत-संस्थान

नई दिल्ली

पुस्तकमिदं राष्ट्रियसंस्कृतसंस्थानस्य पुनर्मुद्रणयोजनायां प्रकाशितम्।

श्रीवाल्मीकिमहामुनिप्रणीतं

# रामायणम्

रामप्रणीत-रामायणतिलक, शिवसहायप्रणीत-रामायणशिरोमणि, गोविन्दराजप्रणीत-
रामायणभूषणेति टीकात्रयेणोपस्कृतम्।

तच्च

कट्टिभि: श्रीनिवासशास्त्रिभि: संशोधितपाठान्तरै: टिप्पण्यादिभिश्च समलंकृतम्।

तथा

सातकडिमुखोपाध्यायशर्मणा विनिर्मिता विशदभूमिकया श्लोकानुक्रमण्या च सनाथीकृतम्

## द्वितीयो भाग:

## (अयोध्याकाण्डम्)

राष्ट्रिय-संस्कृत-संस्थान
मानित विश्वविद्यालय
५६-५७, इन्स्टीट्यूशनल एरिया,
जनकपुरी, नई दिल्ली-११००५८

॥ श्रीः ॥

आदिकविश्रीवाल्मीकिमहामुनिप्रणीतं

# रामायणम् ।

तिलक–रामायणशिरोमणि–गोविन्दराजीये(भूषणे)ति

टीकात्रयसमलंकृतम्

## अयोध्याकाण्डम् ।

### प्रथमः सर्गः ।

भरते शत्रुघ्नेन सह मातुलगृहं गतेऽनेकाभिरामगुणैरावर्जितो दशरथो रामं युवराजं मेने यौवराज्याभिषेकसिद्धये च कैकयराजं विनानेकनृपपुंगवानानाय्य तैः समं सदः प्रविवेश ।

**गच्छता मातुलकुलं भरतेन तदानघः । शत्रुघ्नो नित्यशत्रुघ्नो नीतः प्रीतिपुरस्कृतः ॥ १ ॥**

#### तिलकटीका ।

१ ] अयोध्याख्ये तु गुर्वर्थे त्यक्त्वा राज्यं गिरौ वसन् ।
पादुके भरतायादात्स रामः शरणं मम ॥

अथ रामस्य राज्याभिषेकार्हगुणान्प्रतिपादयितुं राज्याभिषेकादि च प्रतिपादयितुमेतदारम्भः । मातुलकुलं मातुलगृहम् अनघः सोदरस्य लक्ष्मणस्य बलवद्रामाश्रयप्रयुक्तेर्ष्यारहितः नित्यशत्रवः कामादयस्तद्धन्ता नीतः अनेन विना मातुलगृहभुज्यमानसुखमसत्कल्पमिति धिया नीत इत्यर्थः । प्रीत्या भरतविषयस्नेहेन पुरस्कृतो युक्तः तेन भरतनिर्बन्धेन गमनशङ्का वारिता । किं च भरतेन प्रीत्या पुरस्कृतोऽग्रेसरः कृतः तेन परस्परानुरागसूचनम् ॥ १ ॥

#### रामायणशिरोमणिः ।

स्वस्ति श्रीरघुनाथः शर्म ददाति ।
यत्तद्भासा सकलं जगद्विभाति ॥ १ ॥
जयति जानकीजानिर्जननी या तु ।
श्रीमिथिलेशकुमारी जगतः पातु ॥ २ ॥
वेणीमाधवचरणो जयतितराम् ।
मुदं लभे यत्कृपया पातुतराम् ॥ ३ ॥
आजनेयमतिमन्दे भक्तिं ददातु ।
श्रीरामायणतिलकं पूर्तिं यातु ॥ ४ ॥
समाप्य बालकाण्डस्य टीकां वाल्मीकिनिर्मितेः ।
करोम्ययोध्याकाण्डस्य रामायणशिरोमणिम् ॥ ५ ॥

बालकाण्डे सप्रसङ्गं रामप्रादुर्भूतिविवाहादि निरूप्य ब्रह्मादिप्रार्थितरामप्रतिज्ञातरावणवधादि वर्णयितुं रामराज्याभिषेकसमयं निरूपयन्नाह—गच्छतेत्यादिभिः । तदा पित्राज्ञाकाले मातुलकुलं गच्छता भरतेन अनघः अघसंसर्गशून्यः नित्यशत्रुघ्नः नित्यशत्रवो रागद्वेषादयः तन्निवारकः प्रीतिपुरस्कृतः भरतातिप्रीतिविषयीभूतः शत्रुघ्नो नीतः ॥ १ ॥

#### भूषणटीका ।

श्रावं श्रावं शठारेः शमदमवपुषः फुल्लवक्त्रारविन्दा-
दालोच्यालोच्य वाचा प्रकृतिमधुरया प्रोच्य विद्वज्जनेभ्यः ।
गोविन्दार्यः सुधीशः कुशिककुलमणिर्गूढगाढाशयाढ्यं
सम्यक्साकेतकाण्डं सरसजनमुदे सादरं व्याकरोति ॥

प्रथमे काण्डेएतस्मिन्नन्तरेविष्णुरित्यादिना"यतो वा इमानि"इत्यादिश्रुतिप्रतिपादितं जगत्कारणत्वं अहं वेद्मि महात्मानमित्यादिना पुरुषसूक्तोक्तमहापुरुषत्वं त्वमनादिरनिर्देश्य इत्यादिना अचिन्त्यवैभवत्वमित्येवं सर्वस्मात्परत्वमुक्तं अधिकं मेनिरे विष्णुमित्यादिना तदितरेषामपरत्वं च संप्रति तस्य हेयप्रत्यनीककल्याणै-

अनुरूपः स वो नाथो लक्ष्मीवाँल्लक्ष्मणाग्रजः । त्रैलोक्यमपि नाथेन येन स्यान्नाथवत्तरम् ॥ १३ ॥
अनेन श्रेयसा सद्यः [1]संयोक्ष्येऽहमिमां महीम् । गतक्लेशो भविष्यामि सुते तस्मिन्निवेश्य वै ॥ १४ ॥
यदिदं मेऽनुरूपार्थं मया साधु सुमन्त्रितम् । भवन्तो मेऽनुमन्यन्तां कथं वा करवाण्यहम् ॥ १५ ॥

रा० टी०–तमिति । पुष्येण युक्तं चन्द्रमिव पुष्यनक्षत्रयुक्तचन्द्रसदृशकार्यसाधकमित्यर्थः । किंच चन्द्रमिव प्रकाशमानं युक्तं निखिलशक्तिविशिष्टं पुष्येण नक्षत्रेण यौवराज्ये नियोक्तास्मीत्यर्थः ॥ १२ ॥

गो० टी०–तामिति । तं स्वगुणतुल्यगुणं धर्मभृतां धार्मिकाणां वरं पुरुषपुंगवं पुष्येण नक्षत्रेण युक्तं चन्द्रमिव स्थितं तद्वदत्युज्ज्वलं, यद्वा पुष्यनक्षत्रेऽभिषेककरणात् पुष्येण चन्द्रमिवेत्युक्तं यौवराज्ये नियोक्तास्मि, यद्वा चन्द्रमिव स्थितं तं श्वः पुष्येण यौवराज्ये नियोक्तास्मीत्यर्थः ॥ १२ ॥

१३ ] ति० टी०–स वो युष्माकं राजानुरूपो योग्यः । येन राज्ञा न केवलं यूयमेव नाथवन्तः, अपि तु त्रैलोक्यमपि नाथवत्तरम् एवंप्रभावो राम इति भावः ॥ १३ ॥

रा० टी०–अन्विति । येन नाथेनैव त्रैलोक्यमूर्ध्वमध्याधोलोको नाथवत्तरमस्ति स एव अनुरूपः नाथत्वयोग्यो रामो वो नाथः स्यात् । अपिवैशब्दावेवार्थौ ॥ १३ ॥

गो० टी०–दशरथवचनं वाल्मीकिस्तत्त्वज्ञतया श्लाघते–अनुरूप इति । स रामः अनुरूपः अनुगुणः नाथः–लोकस्येति शेषः । अनुरूपत्वे हेतुर्लक्ष्मीवानिति अपरिच्छिन्नतेजस्क इत्यर्थः । तत्रापि हेतुर्लक्ष्मणाग्रज इति लक्ष्मणो लक्ष्मिवर्धन इत्युक्तम् । यद्वा अनुरूपत्वे हेतुर्लक्ष्मणाग्रज इति लक्ष्मण इव सर्वत्र स्वाश्रिते प्रेमशालीत्यर्थः । अथवा अनुरूप इत्यादि नित्यानपायिन्या लक्ष्म्या विशिष्टः परिजनपर्यन्तो रामः सर्वस्य निरुपाधिकः शेषी दशरथस्तु राज्यपालनोपाधिकशेषी । वैइति श्रुत्यादिप्रसिद्धिं द्योतयति 'दासभूताः स्वतः सर्वे ह्यात्मानः परमात्मनः' इत्याद्युक्तेः । तस्य निरुपाधिकशेषित्वे निमित्तमाह–त्रैलोक्यमिति । त्रयो लोका एव त्रैलोक्यं चतुर्वर्णादित्वात्स्वार्थे ष्यञ् । त्रैलोक्यमपि येन नाथेन नाथवत्तरम् अतिशयेन नाथवत् रामस्य रक्षकत्वावलोकने कियन्मात्रं त्रैलोक्यमिति भातीत्यर्थः । अथवा अनेन श्लोकेन रामस्य परत्वमुच्यते सः रामः अनुरूपो नाथः सहजशेषी जगतः अन्ये तु कर्मानुगुणतयौपाधिकाः अनुकूलं रूपं यस्य सोऽनुरूपः समः समविभक्ताङ्गः चन्द्रकान्ताननमित्याद्युक्तनिरुपमसौन्दर्यशालिदिव्यमङ्गलविग्रह इत्यर्थः । अनुकूलं स्वरूपं यस्यासावनुरूपः शतगुणितोत्तरक्रमेण निरतिशयदशाशिरस्कतयाऽभ्यस्यमानानन्दरूप इत्यर्थः । आनन्दो ब्रह्मेति ह्युक्तम् । अनुगतं रूपं यस्यासावनुरूपः सर्वव्यापीत्यर्थः । अनुरूपः अनुप्रविष्टचराचरादिकशरीरः सर्वशरीरीत्यर्थः । अनुरूपः अनुस्यूतरूपः परव्यूहविभवान्तर्याम्यर्चावतारूपेण नानावताररशालीत्यर्थः । अनुरूपः ओः रुद्रस्य रूपं शरीरं तद्विलक्षणशरीरः । 'वपुर्विरूपाक्षमलक्ष्यजन्मता दिगम्बरत्वेन निवेदितं वसु' इत्याद्युक्तरूपविलक्षणरूपः पुण्डरीकाक्षत्वादियुक्तः । उस्वरूपभिन्न इति त्रिमूर्तिसाम्यं च निरस्यते । वीनां पक्षिणां नाथो विनाथः हंसः तत्संबन्धी वैनाथः अण्यादिवृद्धिः । हंसवाहनः चतुर्मुखः तत्सहितः स वैनाथः नाभिपद्मस्थलस्थितचतुर्मुख इत्यर्थः । वैनाथो गरुडवाहनो वा नाथत्वे हेतुर्लक्ष्मीवानिति नित्ययोगे मतुप् 'ह्रीश्च ते लक्ष्मीश्च पत्न्यौ' 'अप्रमेयं हि तत्तेजो यस्य सा जनकात्मजा । वेदान्तास्तत्त्वचिन्तां मुरभिदुरसि यत्पादचिह्नैस्तरन्ति' पत्नीविशिष्टत्ववत् परिजनविशिष्टत्वमाह–लक्ष्मणाग्रज इति । लक्ष्मणशब्दः कैङ्कर्यपरमात्रोपलक्षणार्थः अग्रज इति तन्निरूप्यत्वोक्त्या आश्रितपारतन्त्र्यमुक्तम् । ननु कथमयमनुरूपो नाथः ब्रह्मरुद्रादयोऽपि हि सन्ति नाथा इत्यत्राह–त्रैलोक्यमपीति । कृतकमकृतकं कृतकाकृतकमित्युक्तं समस्तं जगदित्यर्थः । येन नाथेन नाथवदित्यनेनेन्द्रादिव्यावृत्तिः तरपा ब्रह्मरुद्रादिव्यावृत्तिः तन्नाथत्वस्यैतन्मूलत्वात् 'युगकोटिसहस्राणि विष्णुमाराध्य पद्मभूः । पुनस्त्रैलोक्यधातृत्वं प्राप्तवानिति शुश्रुम ॥ महादेवः सर्वमेधे महात्मा हुत्वात्मानं देवदेवो बभूव' इत्यादिस्मृतयस्तत्र मानं त्रैलोक्यं नाथवत्तरं रक्ष्यापेक्षया रक्षकत्वराधिक्येत्यर्थः (?) ॥ १३ ॥

१४ ] ति० टी०–श्रेयसा प्रशस्ततरेण रामेण महीं संयोक्ष्ये, राज्याभिषेकद्वारेणेत्यर्थः । एवं सति तस्मिन्सुते तत्पालनभारं निवेश्य गतक्लेशो भविष्यामि ॥ १४ ॥

रा० टी०–अनेनेति । अत एव श्रेयसा सर्वमङ्गलहेतुना अनेन रामेण इमां महीं संयोक्ष्ये ॥ १४ ॥

गो० टी०–अनेनेति । इमां मया चिरकालधृतां महीं तस्मिन् ज्येष्ठे सुते निवेश्य महीपालनभारं निक्षिप्येत्यर्थः । अनेन तन्निवेशरूपेण श्रेयसा च महीमेवं सद्यः संयोज्य गतक्लेशः गतराज्यभरणक्लेशो भविष्यामि रामाभिषेकस्य द्वे फले मह्याः श्रेयो मम विश्रान्तिश्चेति भावः ॥ १४ ॥

१५ ] ति० टी०–म इदमभिषेकरूपं कार्यं यद्यदि मया साधु सुमन्त्रितं भवतामनुरूपार्थमनुकूलप्रयोजनावहं च तदा भवन्तो मे ममानुमन्यन्तामनुमतिं प्रयच्छन्तु । हर्षयुक्तत्वाद्धुरस्मच्छब्दपौनरुक्त्यमदोषाय । इतोऽतिरिक्तं वा कथं केन प्रकारेण किं करवाणि तद्वदन्त्विति शेषः ॥ १५ ॥

रा० टी०–यदिदिति । मे मम अनुरूपः योग्यः अर्थो यस्मिन् तत् इदं रामाभिषेचनं यत् यदि मया साधु सुमन्त्रितं

१ संयोक्ष्यैवमिति गो. पाठः ।

श्रीवाल्मीकिमहामुनिप्रणीतं

# रामायणम्

रामप्रणीत-रामायणतिलक, शिवसहायप्रणीत-रामायणशिरोमणि,
गोविन्दराजप्रणीत-रामायणभूषणेति टीकात्रयेणोपस्कृतम्।

तच्च

कश्चिभिः श्रीनिवासशास्त्रिभिः संशोधितपाठान्तरैः टिप्पण्यादिभिश्च समलङ्कृतम्।


राष्ट्रिय-संस्कृत-संस्थान

नई दिल्ली

पुस्तकमिदं राष्ट्रियसंस्कृतसंस्थानस्य पुनर्मुद्रणयोजनायां प्रकाशितम्।

श्रीवाल्मीकिमहामुनिप्रणीतं

# रामायणम्

रामप्रणीत-रामायणतिलक, शिवसहायप्रणीत-रामायणशिरोमणि, गोविन्दराजप्रणीत-रामायणभूषणेति टीकात्रयेणोपस्कृतम्।

तच्च

कट्टिभिः श्रीनिवासशास्त्रिभिः संशोधितपाठान्तरैः टिप्पण्यादिभिश्च समलंकृतम्।

तथा

सातकडिमुखोपाध्यायशर्मणा विनिर्मिता विशदभूमिकया श्लोकानुक्रमण्या च सनाथीकृतम्

## तृतीयो भागः

## (अरण्यकाण्डम्)

राष्ट्रिय-संस्कृत-संस्थान

मानित विश्वविद्यालय

५६-५७, इन्स्टीट्यूशनल एरिया,

जनकपुरी, नई दिल्ली-११००५८

तमुवाच ततो रामो राक्षसं ज्वलिताननम् । पृच्छन्तं सुमहातेजा इक्ष्वाकुकुलमात्मनः ॥ २ ॥
क्षत्रियौ वृत्तसंपन्नौ विद्धि नौ वनगोचरौ । त्वां तु वेदितुमिच्छावः कस्त्वं चरसि दण्डकान् ॥ ३ ॥
तमुवाच विराधस्तु रामं सत्यपराक्रमम् । हन्त वक्ष्यामि ते राजन्निबोध मम राघव ॥ ४ ॥
पुत्रः किल जवस्याहं माता मम शतह्रदा । विराध इति मामाहुः पृथिव्यां सर्वराक्षसाः ॥ ५ ॥
तपसा चाभिसंप्राप्ता ब्रह्मणो हि प्रसादजा । शस्त्रेणावध्यता लोकेऽच्छेद्याभेद्यत्वमेव च ॥ ६ ॥
उत्सृज्य प्रमदामेनामनपेक्षौ यथागतम् । त्वरमाणौ पलायेथां न वां जीवितमाददे ॥ ७ ॥
तं रामः प्रत्युवाचेदं कोपसंरक्तलोचनः । राक्षसं विकृताकारं विराधं पापचेतसम् ॥ ८ ॥

---

पृच्छतं मन्मिति शेषः । ब्रूतमिति लोण्मध्यमपुरुषद्विवचनम् । प्रश्नप्रकारमाह—काविति ॥ १ ॥

२ ] ति० टी०—ज्वलिताननं राक्षसत्वान्मुखनिःसृताग्निज्वालया आत्मन इक्ष्वाकुसंबन्धि कुलमुवाचेत्यर्थः ॥ २ ॥

रा० टी०—तमिति । ततः राक्षसवचःश्रवणानन्तरं पृच्छन्तं राक्षसं सुमहातेजाः रामः उवाच । तद्वचनाकारमाह—आत्मनो मम इक्ष्वाकुकुलं विद्धि अत एव वृत्तसंपन्नौ स्वकुलोचितवृत्तविशिष्टौ अत एव वनगोचरौ वनं प्राप्तौ क्षत्रियौ नौ आवां विद्धि जानीहि यस्त्वं दण्डकान् चरसि तं त्वां तु वेदितुं ज्ञातुमिच्छावः । श्लोकद्वयमेकान्वयि ॥ ३ ॥ ४ ॥

गो० टी०—तमिति । राक्षसत्वेन प्रकृत्या ज्वलिताननमिति भयहेतूक्तिः । आत्मनः संबन्धि इक्ष्वाकुकुलमुवाचेत्यन्वयः इक्ष्वाकुवंश्यदशरथपुत्रावावां पितृवचनाद्वनं गमिष्याव इत्युवाचेत्यर्थः ॥ २ ॥

३ ] ति० टी०—क्षत्रियौ इक्ष्वाकुवंशजाविति शेषः । वनगोचरौ बहुव्रीहिः । कुतश्चिद्धेतोरिति शेषः ॥ ३ ॥

गो० टी०—अधर्मचारिणौ पापाविति पूर्वोक्तविराधवचनस्यानन्तरमाह—क्षत्रियौ वृत्तसंपन्नाविति । त्वामिति । कस्य पुत्रः किंप्रभाव इति ज्ञातुमिच्छामीत्यर्थः । अहं वनमिदं दुर्गं विराधो नाम राक्षस इति नामजात्योः पूर्वमुक्तत्वान्न तद्विषयोऽयं प्रश्नः ॥ ३ ॥

४ ] ति० टी०—निबोध मम वचनान्मम स्वरूपमिति शेषः ॥ ४ ॥

रा० टी०—तमिति । विराधस्तु हे राजन् ! अहं वक्ष्यामि त्वं निबोध शृणु इति तं पृच्छन्तं राममुवाच ॥ ५ ॥

गो० टी०—तमिति । हन्तेति । स्वाभिप्रायकीर्तनोद्योगजगर्वेण मम मत्तः मे स्वरूपमिति शेषः, निबोधेत्युवाचेत्यन्वयः ॥ ४ ॥

५ ] ति० टी०—जवस्य जवनाम्नः ॥ ५ ॥

रा० टी०—तद्वचनाकारमाह—पुत्र इति । जवस्य जवाभिधस्य अहं पुत्रः शतह्रदा तदभिधा मम माता सर्वराक्षसाः विराधमिति मामाहुः ॥ ६ ॥

गो० टी०—पुत्रः किलेति । विराधः विगताराधनः दुराराध्य इत्यन्वर्थसंज्ञः राक्षसाः सजातीयाः सजातीयैः कृतं नामेदं न तु मातापितृभ्यामिति भावः ॥ ५ ॥

६ ] ति० टी०—लोके प्राणिलोके शस्त्रेण शस्त्रसामान्येन किं च अच्छेद्याभेद्यत्वं प्राणवियोजनाय छेदभेदाशक्यगात्रत्वं च प्राप्तमित्यर्थः ॥ ६ ॥

रा० टी०—तपसेति । तपसा हेतुभूतेन ब्रह्मणः प्रसादजा शस्त्रेण अवध्यता वध्यत्वाभावं संप्राप्ता अच्छेद्याभेद्यत्वं च प्राप्तं तत्राच्छेद्यत्वमवयवद्वैधीभवनाभावः अभेद्यत्वं शरीरे व्रणप्राप्त्यभावः, वस्तुतस्तु छेद्येन छेत्तुमर्हेण प्राकृतशस्त्रेणेत्यर्थः, अभेद्यत्वं विदारणाभावं च प्राप्तमित्यर्थः, अत एव वक्ष्यमाणरामशस्त्रकरणकभेदनं संगच्छते तेषां प्राकृतभिन्नत्वात् ॥ ७ ॥

गो० टी०—तपसा चापीती । चापि किंच तपसा साधनेन ब्रह्मणः प्रसादजा शस्त्रेणावध्यता अमारणीयता प्राप्ता अच्छेद्याभेद्यत्वं च प्राप्तं प्राणवियोजनहेतुखण्डनविदारणानर्हत्वं च प्राप्तमित्यर्थः ॥ ६ ॥

७-८] ति० टी०—यदेवमतः—उत्सृज्येत्यादि । अनपेक्षौ प्रमदाशया युद्धाशया च रहितौ वां युवयोः ॥ ७ ॥ ८ ॥

रा० टी०—रामहस्तात्स्ववधकामस्तं कोपयन्नाह—उत्सृज्येति । एनां प्रमदां स्वाप्रियमुत्सृज्य त्यक्त्वा अनपेक्षौ एतत्प्राप्तिविषयकेच्छारहितौ त्वरमाणौ युवां यथागतमागतं मार्गमनतिक्रम्य पलायेथाम् । तत्र हेतुः—वां युवयोर्जीवितं जीवनमहं न आददे गृह्णामि ॥ ८ ॥

गो० टी०—उत्सृज्येति । अनपेक्षौ अपेक्षायां मरणं ध्रुवमिति भावः । त्वरमाणौ मन्दगमने मे मनश्चलेदिति भावः । न वां जीवितमाददे उत्तमप्रमदारत्नप्रापणादिति भावः ॥ ७ ॥

रा० टी०—तमिति । कोपसंरक्तलोचनः कोपेन दुष्टत्वदूरीकरणाय स्वीकृतकोपाभासेन संरक्ते लोचने यस्य स रामः पापचेतसं जन्मप्रभृतिपापकरणशीलं विकृताकारं विराधमिदं प्रत्युवाच ॥ ९ ॥

गो० टी०—तमिति । तम् एवं परुषं वदन्तं परुषवचनादेव हेतोः कोपसंरक्तलोचनः विकृताकारं विकृताकारमपि पापे सीताहरणे चेतो यस्य तम् ॥ ८ ॥

---

१ जयस्येति गो. पाठः । २ चापि मे इति गो. पाठः ।

पुस्तकमिदं राष्ट्रियसंस्कृतसंस्थानस्य पुनर्मुद्रणयोजनायां प्रकाशितम्।

श्रीवाल्मीकिमहामुनिप्रणीतं

# रामायणम्

रामप्रणीत-रामायणतिलक, शिवसहायप्रणीत-रामायणशिरोमणि, गोविन्दराजप्रणीत-रामायणभूषणेति टीकात्रयेणोपस्कृतम्।

तच्च

कट्टिभिः श्रीनिवासशास्त्रिभिः संशोधितपाठान्तरैः टिप्पण्यादिभिश्च समलंकृतम्।

तथा

सातकडिमुखोपाध्यायशर्मणा विनिर्मिता विशदभूमिकया श्लोकानुक्रमण्या च सनाथीकृतम्

## चतुर्थो भागः

## (किष्किन्धा काण्डम्)

राष्ट्रिय-संस्कृत-संस्थान

मानित विश्वविद्यालय

५६-५७, इन्स्टीट्यूशनल [illegible]

जनकपुरी, नई [illegible]

॥ श्रीः ॥

आदिकविश्रीवाल्मीकिमहामुनिप्रणीतं

# रामायणम् ।

तिलक-रामायणशिरोमणि-गोविन्दराजीये(भूषणे)ति-
टीकात्रयसमलंकृतम्

# किष्किन्धाकाण्डम् ।

## प्रथमः सर्गः ।

पम्पामुपागतो रामो लक्ष्मणं संबोधयन्पंम्पातीरारण्यरामणीयकदर्शनेनोद्दीपितानङ्गव्यथः सीतां संस्मरन्बहुविधं परिदेवयते सचिवैः सममृष्यमूके निवसन्सुग्रीवः पम्पापरिसरचारिणं रामं ददर्श ।

**स तां पुष्करिणीं गत्वा पद्मोत्पलझषाकुलाम् । रामः सौमित्रिसहितो विललापाकुलेन्द्रियः ॥ १ ॥**

### तिलकटीका ।

सुग्रीवस्यावनं तुर्यं इन्द्रसूनोश्च मर्दनम् ।
मारुतेर्मुद्रिकादानं कृतं येन स मे गतिः ॥

१ ] स विराधादिवधेन प्रसिद्धपराक्रमः पम्पादर्शनोद्दीपितकामो वा तां सुग्रीवाधिष्ठितर्ष्यमूकसमीपगां पुष्करिणीं पम्पांनद्यन्तरगतं पम्पाख्यं मतङ्गाख्यं वा सरोविशेषम् । विललाप पर्यदेवयत् ॥ १ ॥

### रामायणशिरोमणिः ।

प्रणम्याद्यां गङ्गां निखिलभयभङ्गां सयमुनां
सवाचं वाल्मीकिं पवनतनयं लक्ष्मणयुतम् ।
गुरुं गीतं वन्दे मुनिगणनुतं रामचरणं
सदा सीतासेव्यं सकलसुखदातारमनिशम् ॥ १ ॥
यदीयां विष्ण्वाद्या निखिलभुवनाधीशपतयः
सदा संसेवन्ते मुनिगणयुतां तत्त्वनिवहाम् ।
गिरं तां गीर्वाणाः सकलकलया कालवलयाः
समीहन्ते नित्यं सकलभयहन्त्रीं सुमुददाम् ॥ २ ॥
कथादिर्यस्यास्ते त्रिभुवनजयी जह्नुतनया
यदीयां संप्रीतिं वितरति सदा सेवकजने ।
स रामस्तीर्थानां परममभिरामः सुमनसां
जयत्युच्चैः श्रीमान् जनकतनयासक्तहृदयः ॥ ३ ॥
अथारण्ये पूर्णां विवृतिमनुकल्प्याद्यकविना
कृते काव्ये कुर्मः सुजनसुखसंपत्तिविपुलाम् ।
सुकिष्किन्धाव्याख्यां परमरसिकोपास्यसफलां
त्रिवेणीतीरे तां दशरथसुतप्रीतिवितराम् ॥ ४ ॥
किष्किन्धाया विवरणो रामायणशिरोमणिः ।
सीतारामप्रियां प्रीतिं दद्यात्सर्वसुखावहाम् ॥ ५ ॥

रामकर्तृकपम्पाप्रदर्शनमारण्यकाण्डान्ते उक्त्वा तत्रत्यरामवृत्तान्तं वर्णयन् किष्किन्धाकाण्डमुपक्रमते—स तामित्यादिभिः । सः सर्ववेदप्रसिद्धः सौमित्रिसहितो रामः पद्मादिविशिष्टां पुष्करिणीं सरसीं तां पम्पां गत्वा संप्राप्य आकुलेन्द्रियः सीतासंयोगाभावप्रयुक्तव्याकुलेन्द्रियविशिष्टः सन् विललाप अनेकविधं जगाद ॥ १ ॥

### भूषणटीका ।

क्वाहं मन्दमतिर्गभीरमधुरं रामायणं तत्क्व च
व्याख्यानेऽस्य परिश्रमन्नहमहो हासास्पदं धीमताम् ।
को भारोऽत्र मम स्वयं कुलगुरुः कोदण्डपाणिः कृपा-
कूपारो रचयत्यदः सपदि मज्जिह्वाग्रसिंहासनः ॥१॥

# एकादशः सर्गः ।

रामबलं परिज्ञापयितुं वालिबलकथने प्रवृत्तः सुग्रीवः । वीर्योत्सिक्तदुन्दुभिनाम्नाऽसुरेण युद्धार्थं वालिनः समाह्वानं कृतम्, वालिना तं निहत्य मतङ्गर्षेराश्रमपरिसर उत्क्षेपणं च कृतम्, तन्मुखोच्छलद्रुधिरबिन्दुभिराश्रमदुष्टेः कुपितर्षेः ' यद्येतत्कर्तैतद्वनं प्रविशेत्स न जीवेत् ' इति शापविस्रष्टेरहमत्र निर्भयो वसामीत्युपक्रम्यैवं बलिष्ठस्यापि वालिनो नाशक ते वीर्यं कथमवधारयामीतिसंदिहानं सुग्रीवं वद यत्करणेन ते संदेहो नश्येदिति लक्ष्मणेनोक्ते वालिनिर्दिष्टदुन्दुभ्यस्थिकङ्कालं रामः पादाङ्गुष्ठेन चिक्षेप शुष्कोऽयं पञ्जरस्तदानींतनाल्पीयस्त्वान्नानेन बलमवधारयितुं शक्यं किंतु यद्येतेषामेकं सालं भिन्द्यारवश्यं ते बलं वालिविनाशकं मन्य इति सुग्रीवः आक्षिपते ।

**रामस्य वचनं श्रुत्वा हर्षपौरुषवर्धनम् । सुग्रीवः पूजयाञ्चक्रे राघवं प्रशशंस च ॥ १ ॥**
**असंशयं प्रज्वलितैस्तीक्ष्णैर्मर्मातिगैः शरैः । त्वं दहेः कुपितो लोकान्युगान्त इव भास्करः॥ २ ॥**
**वालिनः पौरुषं यत्तद्यच्च वीर्यं धृतिश्च या । तन्ममैकमनाः श्रुत्वा विधत्स्व यदनन्तरम् ॥ ३ ॥**
**समुद्रात्पश्चिमात्पूर्वं दक्षिणादपि चोत्तरम् । क्रामत्यनुदिते सूर्ये वाली व्यपगतक्लमः ॥ ४ ॥**

---

मग्नो रिपुहृतदारत्वान्मद्वदित्यनुमानम् । बाढं प्राप्स्यमि भार्यां पुष्कलं राज्यं च ॥ ३४ ॥ ३६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे दशमः सर्गः ॥१०॥

**रा० टी०—आत्मेति** । आत्मानुमानात् स्वदृष्टान्तकानुमानरूपप्रमाणतः त्वं शोकसागरे मग्न इत्यहं पश्यामि जानामि अतः त्वामहं तारयिष्यामि शोकसागरात्पारं प्रापयिष्यामि अतः पुष्कलं संपूर्णं भार्यां राज्यं चेत्यर्थः, बाढं यथा भवति तथा प्राप्स्यसि ॥ ३४ ॥

**रा० टी०—तस्येति** । हर्षपौरुषवर्धनं तस्य रामस्य तद्वचनं श्रुत्वा परमप्रीतः सुग्रीवः समहद्वाक्यमब्रवीत् ॥ ३६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे दशमः सर्गः ॥ १० ॥

**गो० टी०—आत्मानुमानादिति** । आत्मानुमानात् आत्मवत्सर्वभूतानीति न्यायादित्यर्थः । तारयिष्यामि शोकसागरादिति शेषः ॥ ३४–३६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने दशमः सर्गः ॥ १० ॥

---

१ ] **ति० टी०—इदानीं वालिनो बलमाह–रामस्येति** । वचनं वालिवधविषयम् ॥ १ ॥

**रा० टी०—रामं प्रति सुग्रीवोक्तिं वर्णयन्नाह–रामस्येत्यादिभिः** । सुग्रीवः रामस्य वचनं श्रुत्वा राघवं रामं पूजयाञ्चक्रे बद्धाञ्जल्यादिना तोषयाञ्चक्रे प्रशशंस च ॥ १ ॥

**गो० टी०—अथ सुग्रीवो वालिवधक्षमं रामबलं परीक्षितुकामस्तद्बलं दर्शयत्येकादशे–रामस्येत्यादि** । पूजयाञ्चक्रे अञ्जलिबन्धादिना । प्रशशंस तुष्टाव ॥ १–२ ॥

२] **ति० टी०—राघवं प्रशशंसेत्युक्तं तां प्रशंसामाह–असंशयमिति**॥ २ ॥

**रा० टी०—प्रशंसाप्रकारं बोधयन्नाह–असंशयमिति** । यद्यपि कुपितस्त्वं युगान्ते भास्कर इव मर्मातिगैः मर्मप्रवेशिभिः शरैः लोकान् असंशयं यथा भवति तथा प्रदहेः तथापि वालिनः पौरुषादि त्वमेकमनाः सन् श्रुत्वा तदनन्तरं विधत्स्व तद्वधप्रयत्नं कुरु । एतेन वालिनः पौरुषादेर्लोकोत्तरत्वं व्यञ्जितं यद्यपीत्यध्याहृतम् । श्लोकद्वयमेकान्वयि ॥ २ ॥ ३ ॥

३ ] **ति० टी०—पौरुषं** बलवैभवम् । वीर्यं परसंहारशक्तिः । धृती रणे धैर्यम् ॥ ३ ॥

**गो० टी०—वालिन इति** । पौरुषं बलम् अनन्तरं यत्कर्तव्यं तद्विधत्स्व ॥ ३ ॥

४ ] **ति० टी०—अनुदिते** सूर्ये क्रामति । ब्राह्मे मुहूर्ते उत्थायेति शेषः ॥ ४ ॥

**रा० टी०—तत्पौरुषाद्येवाह–समुद्रादित्यादिभिः** । व्यपगतक्लमो वाली ब्राह्मे मुहूर्ते उत्थायेति शेषः, सूर्ये अनुदिते उदयमप्राप्नुवति सति पश्चिमात् समुद्रात् पूर्वं समुद्रं क्रामति गच्छति ततो दक्षिणं प्राप्नोतीति शेषः दक्षिणात्समुद्रात् उत्तरमपि क्रामति ॥ ४ ॥

**गो० टी०—समुद्रादिति** । ब्राह्मे मुहूर्ते उत्थाय इति ब्राह्ममुहूर्तस्य संध्याकर्मकालत्वेन तस्मिन्नुत्थाय अनुदिते सूर्ये संध्याकर्मकरणार्थं पश्चिमात्समुद्रात्पूर्वसमुद्रं दक्षिणात्समुद्रादुत्तरं समुद्रं च व्यपगतक्लमः सन् क्रामति । इदं व्यक्तमुत्तरकाण्डे । तारः–चतुर्भ्योऽपि समुद्रेभ्यः संध्यामन्वास्य रावण । इमं मुहूर्तमायाति वाली तिष्ठ मुहूर्तकम्' इति ॥ ननु कथं चतुर्ष्वप्येकसंध्याकरणम् । उच्यते, एकस्मिन् तटाके पार्श्वभेद इव स्नानाचमनार्घ्यप्रदानजपानां कर्तुं शक्यत्वात् अनुदिते सूर्य इत्युत्तरावधिरभिहितः । पूर्वावधिस्तु–ब्राह्मे मुहूर्ते उत्थायेत्यनुष्ठानाङ्गत्वेन विहितः कालः । चतुःसमुद्रपरिक्रमस्यानुष्ठानार्थत्वम् 'चतुर्भ्योऽपि समुद्रेभ्यः संध्यामन्वास्य रावण । इमं मुहूर्तमायाति वाली तिष्ठ मुहूर्तकम् ॥' इत्युत्तरश्रीरामायणोक्तताद्वचनादवगम्यते ॥ ४ ॥

पुस्तकमिदं राष्ट्रियसंस्कृतसंस्थानस्य पुनर्मुद्रणयोजनायां प्रकाशितम्।

श्रीवाल्मीकिमहामुनिप्रणीतं

# रामायणम्

रामप्रणीत-रामायणतिलक, शिवसहायप्रणीत-रामायणशिरोमणि, गोविन्दराजप्रणीत-रामायणभूषणेति टीकात्रयेणोपस्कृतम्।

तच्च

कट्टिभिः श्रीनिवासशास्त्रिभिः संशोधितपाठान्तरैः टिप्पण्यादिभिश्च समलंकृतम्।

तथा

सातकडिमुखोपाध्यायशर्मणा विनिर्मिता विशदभूमिकया श्लोकानुक्रमण्या च सनाथीकृतम्

## पञ्चमो भागः

## (सुन्दरकाण्डम्)

राष्ट्रिय-संस्कृत-संस्थान

मानित विश्वविद्यालय

५६-५७, इन्स्टीट्यूशनल एरिया,

जनकपुरी, नई दिल्ली-११००५८

॥ श्रीः ॥

आदिकविश्रीवाल्मीकिमहामुनिप्रणीतं

# रामायणम् ।

तिलक–रामायणशिरोमणि–गोविन्दराजीये(भूषणे)ति-
टीकात्रयसमलंकृतम्

## सुन्दरकाण्डम् ।

### प्रथमः सर्गः ।

सीतामन्वेष्टुं लङ्कां जिगमिषुर्हनुमान् महेन्द्रशिखरादुत्प्लुत्य जलमध्यादुद्गत्य स्वशिखरे विश्राममर्थयमानं मैनाकं करतलसंस्पर्शनेन संमान्य स्वबलपरिरक्षया वरदानपूर्वकं देवैः प्रेषितां निट्चरीरूपधारिणीं सुरसां मुखं व्यादाय परिपालयन्तीं धृतसूक्ष्मरूपस्तदुदरं प्रविश्यापि अहिंसित्वैव बहिर्निरगच्छत् । तथैव सिंहिकाख्यनिट्चरीं मुखं व्यादाय ग्रसितुं प्रतिपालयन्तीं स्वीकृतसूक्ष्मदेहस्तदुदरं प्रविश्य विदारणपूर्वकं व्यापादयत् । अथ च राक्षसजनसंभ्रमं वारयिष्यन्निजदेहं तनूकृत्य लङ्काबहिःस्थलम्बगिरिशिखरे न्यपतत् ।

**ततो रावणनीतायाः सीतायाः शत्रुकर्षणः । इयेष पदमन्वेष्टुं चारणाचरिते पथि ॥ १ ॥**

#### तिलकटीका ।

सुन्दरे यस्य दासोऽब्धिं तीर्त्वा दृष्ट्वा च मैथिलीम् ।
दृष्टा सीतेत्यभ्यवोचत्तं रामं नौमि चिद्घनम् ॥

१ ] अथ समुद्रकूर्दनमिच्छति स्म—तत इति । ततः शत्रुकर्षणो हनुमान्रावणनीतायाः रावणहृतायाः सीतायाः पदमवस्थितिस्थानमन्वेष्टुं चारणैर्देवजातिविशेषैराचरिते क्रियमाणसंचारे पथ्याकाशमार्गे गमनायेयेष ॥ १ ॥

#### रामायणशिरोमणिः ।

स्वस्ति श्रीमनुवंशवर्धनपरं सर्वेश्वरैः संस्तुतं
श्रीरामं सह लक्ष्मणं सुरतरुप्रख्यं सदा मारुतिम् ।
सीताध्यानपरायणं सुरनुतं ज्ञानप्रदं सत्कृतं
रामेणाखिलराजराजितपदा वन्देऽप्यभीष्टप्रदम् ॥ १ ॥
वन्दे त्रिवेणीं निखिलार्थवेणीं
वन्दे प्रयागं सुविशालयागम् ।
वन्दे महान्तं गुरुमार्यभान्तं
वन्दे गणेशं सुखसर्वदेशम् ॥ २ ॥
वाल्मीकेश्चरणौ नत्वा तदीयरचिते परे ।
सुन्दरे विवृतिं कुर्मो रामायणशिरोमणिम् ॥ ३ ॥
यस्य सान्निध्यमात्रेण ब्रह्मत्वं प्राप्यते जनैः ।
तं वन्दे सर्वदातारं त्रिवेणातिटमुत्तमम् ॥ ४ ॥
सीतारामसमारम्भां शुकाचार्यादिमध्यगाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥ ५ ॥

रा० टी०–जाम्बवत्कृतकसागरतरणोद्देश्यकप्रोत्साहनानन्तरकालिकं वृत्तान्तमाह–तत इत्यादिभिः । ततः स्ववीर्यस्मरणानन्तरं सीतायाः पदं स्थितिप्रदेशमन्वेष्टुं चारणैर्देवजातिविशेषैः आचरिते अतिसंचारविशिष्टे पथि आकाशमार्गे प्राप्तुमिति शेषः, इयेष वव्राञ्छ ॥ १ ॥

#### भूषणटीका ।

तत्त्वज्ञानसमुच्चयो घनदयासारस्य सारो महा-
न्निष्कर्षः कमलानिवासचरणद्वन्द्वानुरागस्मृतेः ।
अक्लेशः परिपाक एष जगतामक्षय्यपुण्यावले-
रस्माकं निधिरक्षयो विजयते श्रीमान् शठारिर्गुरुः ॥ १ ॥

१ कर्शन इति गो. पाठः ।

यस्य त्वेतानि चत्वारि वानरेन्द्र यथा तव । धृतिर्दृष्टिर्मतिर्दाक्ष्यं स कर्मसु न सीदति ॥ १९० ॥
स तैः संपूजितः पूज्यः प्रतिपन्नप्रयोजनैः । जगामाकाशमाविश्य पन्नगाशनवत्कपिः ॥ १९१ ॥
प्राप्तभूयिष्ठपारस्तु सर्वतः परिलोकयन् । योजनानां शतस्यान्ते वनराजीं ददर्श सः ॥ १९२ ॥
ददर्श च पतन्नेव विविधद्रुमभूषितम् । द्वीपं शाखामृगश्रेष्ठो मलयोपवनानि च ॥ १९३ ॥
सागरं सागरानूपान्सागरानूपजान्द्रुमान् । सागरस्य च पत्नीनां मुखान्यपि विलोकयत् ॥ १९४ ॥
स महामेघसंकाशं समीक्ष्यात्मानमात्मवान् । निरुन्धन्तमिवाकाशं चकार मतिमान्मतिम् ॥ १९५ ॥
कायवृद्धिं प्रवेगं च मम दृष्ट्वैव राक्षसाः । मयि कौतूहलं कुर्युरिति मेने महामतिः ॥ १९६ ॥
ततः शरीरं संक्षिप्य तन्महीधरसंनिभम् । पुनः प्रकृतिमापेदे वीतमोह इवात्मवान् ॥ १९७ ॥
तद्रूपमतिसंक्षिप्य हनूमान्प्रकृतौ स्थितः । त्रीन्क्रमानिव विक्रम्य बलिवीर्यहरो हरिः ॥ १९८ ॥

---

दृष्टिर्नावसीदति या मतिर्नावसीदति यद्दाक्ष्यं नावसीदति एतानि चत्वारि यस्य सन्ति तस्त्वया हतमिति योजना ॥१८८॥१८९॥

१९० ] ति० टी०—निर्बाधं कर्मसाधनहेतुमाह—यस्य त्विति ॥ १९० ॥

रा० टी०—यस्येति । यथा तव एतानि धृत्यादीनि चत्वारि सन्ति तथा यस्य सन्ति स कर्मसु क्रियासु न सीदति न दुःखं प्राप्नोति ॥ १९६ ॥

१९१ ] ति० टी०—स तैः संपूजितस्तैः पूर्वोक्तभूतैः । प्रतिपन्नप्रयोजनैरभिमतं साधयेत्यनुमत्याऽनुगृहीतकार्यैः॥१९१॥

रा० टी०—स इति । पूज्यः सर्वेषां पूजनीयः अत एव तैः आकाशचारिभिः संपूजितः अत एव प्रतिपन्नं निश्चितं प्रयोजनं सीतादर्शनं येन, प्रतिपन्नं सिद्धं यस्येति वा स हनूमान् पन्नगाशनवत् आकाशमाविश्य जगाम ॥ १९७ ॥

गो० टी०—स इति । संभावितः पूजितः । प्रतिपन्नप्रयोजनः प्राक्प्रतिभासितकार्यसारः स च स्त्रीत्वे दोषे समानेऽपि सुरसाया जयप्रतिपत्तिः सिंहिकाया वधप्रतिपत्तिश्च ॥ १९० ॥

१९२ ] ति० टी०—प्राप्तभूयिष्ठः प्राप्तकल्पः पारो येन सः ॥ १९२ ॥

रा० टी०—प्राप्तेति । प्राप्तः भूयिष्ठो बहुः पारो येन स हनूमान् योजनानां शतस्यान्ते विद्यमानां वनराजीं ददर्श॥१९८॥

गो० टी०—प्राप्तेति । प्राप्तभूयिष्ठपारः प्राप्तप्रायतीरः१९१

१९३ ] ति० टी०—पतन्नेव गच्छन्नेव मलयोपवनानि । अनेनोत्तरतीर इव दक्षिणतीरेऽपि मलयाख्यः पर्वतोऽस्तीति गम्यते ॥ १९३ ॥

रा० टी०-ददर्शेति । शाखामृगश्रेष्ठो हनूमान् पतन् गच्छन् सन्नेव विविधद्रुमभूषितं द्वीपं मलयोपवनानि च सागरं च सागरस्य अनूपान् देशांश्च सागरस्य पत्नीनां नदीनां मुखानि सङ्गमस्थलानि विलोकयन् सन् ददर्श । अर्धचतुष्टयमेकान्वयि ॥ १९९ ॥ २०० ॥

गो० टी०—ददर्शेति । मलयोपवनानि लङ्कामलय इति दक्षिणतीरे स्थितमलयः तस्योपवनानि ॥ १९२ ॥

१९४ ] ति० टी०—सागरं दक्षिणतीरसमीपवर्तिसागरम् । अनूपः कच्छदेशः । सागरस्य पत्नीनां लङ्काद्वीपादागत्य सागरं प्रविशन्तीनां नदीनां मुखानि संगमस्थानानि विलोकयद्व्यलोकयत् ॥ १९४ ॥

गो० टी०—सागरमिति । सागरस्य पत्नीनां नदीनां त्रिकूटोत्पन्नानाम् । आत्मानं स्वशरीरम् । मतिं चकार मेन इति यावत् ॥ १९३ ॥ १९४ ॥

१९५ ] ति० टी०—आत्मानं स्वशरीरं महत्त्वादाकाशं निरुन्धन्तमिव । मतिं कर्तव्यनिश्चयम् ॥ १९५ ॥

रा० टी०—स इति । स हनूमान् आकाशं निरुन्धन्तमिव महामेघसंकाशम् आत्मानं स्वदेहं समीक्ष्य मतिं चिन्तां चकार ॥ २०१ ॥

१९६ ] ति० टी०—कौतूहलम् आश्चर्यधिया दिदृक्षामित्यर्थः ॥ १९६ ॥

रा० टी०—चिन्तास्वरूपमाह—कायेति । मम कायवृद्धिं प्रवेगं च दृष्ट्वैव मयि कौतूहलम् आश्चर्यं कुर्युरिति महामतिर्हनुमान् मेने ॥ २०२ ॥

गो० टी०—कथं मेन इत्यत्राह—कायवृद्धिमिति ॥१९५॥

१९७ ] ति० टी०—प्रकृतिं निजमाकारम् । वीतमोहो वीतो नष्टो वासनावशादागतः कामादिमोहो यस्य सः । आत्मवाञ्जीवन्मुक्तयोगी । प्रकृतिम् भगवदनन्यतस्वतालक्षणस्वभावमित्यर्थः ॥ १९७ ॥

रा० टी०—तत इति । ततो विचारानन्तरं महीधरसंनिभं शरीरं संक्षिप्य अल्पत्वं प्रापय्य प्रकृतिं स्वाकृतिं पुनरापेदे । तत्र दृष्टान्तः—वीतमोहः विगतरागः आत्मवान् योगी शरीरं संक्षिप्य तिरस्कृत्य प्रकृतिं नित्यानन्दस्वभावमिव ॥ २०३ ॥

गो० टी०—तत इति । पुनः प्रकृतिमापेदे पुनर्निजाकारं प्राप्तवान् ॥ १९६ ॥

१९८ ] ति० टी०—अतिसंक्षिप्यातिसंकोच्य । त्रीन्क्रमान्पदानि विक्रम्य प्रक्षिप्य बलेर्वीर्यस्य हरो हरिरिव प्रकृतौ स्थितः ॥ १९८ ॥

रा० टी०—तदेव भङ्ग्यन्तरेणाह—तदिति । तत्प्रवृद्धं रूपम् अतिसंक्षिप्य त्रीन् क्रमान् लोकान् विक्रम्य परिमाय बलिवीर्यहरः बलेर्वीर्यस्य ध्वंसकः हरिर्वामन इव प्रकृतौ स्थितः ॥ २०४ ॥

---

१ संभावित इति गो.पाठः । २ प्रयोजन इति गो. रा. पाठः। ३ राजिमिति गो.पाठः । ४ आनूपमिति गो.पाठः। ५ विलोकयन्निति गो.रा.पाठः ।

पुस्तकमिदं राष्ट्रियसंस्कृतसंस्थानस्य पुनर्मुद्रणयोजनायां प्रकाशितम्।

श्रीवाल्मीकिमहामुनिप्रणीतं

# रामायणम्

रामप्रणीत-रामायणतिलक, शिवसहायप्रणीत-रामायणशिरोमणि, गोविन्दराजप्रणीत-रामायणभूषणेति टीकात्रयेणोपस्कृतम्।

तच्च

कट्टिभिः श्रीनिवासशास्त्रिभिः संशोधितपाठान्तरैः टिप्पण्यादिभिश्च समलंकृतम्।

तथा

सातकडिमुखोपाध्यायशर्मणा विनिर्मिता विशदभूमिकया श्लोकानुक्रमण्या च सनाथीकृतम्

## षष्ठो भागः

## युद्धकाण्डम्

राष्ट्रिय-संस्कृत-संस्थान

मानित विश्वविद्यालय

५६-५७, इन्स्टीट्यूशनल एरिया,

जनकपुरी, नई दिल्ली-११००५८

॥ श्रीः ॥

आदिकविश्रीवाल्मीकिमहामुनिप्रणीतं

# रामायणम् ।

तिलक-रामायणशिरोमणि-गोविन्दराजीय(भूषण)ति-

टीकात्रयसमलंकृतम्

# युद्धकाण्डम् ।

## प्रथमः सर्गः ।

श्रीरामो हनुमद्वाक्यं श्रुत्वानितरशक्य सद्भृत्योचितकार्यकरणेनातिहृष्टमनास्तं परिष्वज्य प्रशंसति ।

श्रुत्वा हनूमतो वाक्यं यथावदभिभाषितम् । रामः प्रीतिसमायुक्तो वाक्यमुत्तरमब्रवीत् ॥ १ ॥

### तिलकटीका ।

युद्धं रक्षोगणान्हत्वा पुष्पकेण निजां पुरीम् ।
सीतया सह चागत्य रेजे रामोऽभिषेचितः ॥

१ ] एवं हनूमतः सकाशात्सीतावृत्तान्तं श्रुत्वा कृतकार्ये भृत्ये स्वामिन उचितां वृत्तिं लोकेभ्य उपदेष्टुं हनूमन्तमस्तौषीदित्याह—श्रुत्वेति । उत्तरं प्रियश्रवणोत्तरकालयोग्यम् ॥ १ ॥

### रामायणशिरोमणिः ।

स्वस्ति श्रीरघुवंशभूषणमहं राजाधिराजं परं
श्रीमद्वायुसुतेडितं परविभुं सुग्रीवसंसेवितम् ।
श्रीमल्लक्ष्मणलक्षितं जनकजां ध्यायन्तमाद्यं सुखं
रामं नित्यसुखप्रदं सुरमुदं सर्वेश्वरेशं भजे ॥ १ ॥
नत्वा तच्चरणौ सुखौ सुखकरौ तत्सेवकं मारुतिं
वाल्मीकिं कविनायकं गुरुमहं रामायणे रामगे ।
वाल्मीकेरतिनिर्मितेऽद्भुततमे युद्धं करोम्यद्य तां
टीकां रामपदारविन्दरतिदां श्रीरामसंतोषिणीम् ॥ २ ॥
नत्वा त्रिवेणीं निखिलार्थवेणीं
वेणीधरार्याचितपादवेणीम् ।
कूर्मः प्रयागं सकलार्थभागे
श्रीमत्त्रिवेणीनटयिद्धयागे ॥ ३ ॥
श्रीमद्रामायणव्याख्या वाल्मीकिहृदयार्पिका ।
रामेच्छया प्रवृत्तेयं रामायणशिरोमणिः ॥ ४ ॥
सीतारामसमारम्भां शुकाचार्यादिमध्यगाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥ ५ ॥

हनुमत्कर्तृकसीतासंदेशोक्त्या सुन्दरकाण्डं समाप्य तद्वचनश्रवणानन्तरकालिकं रामवृत्तान्तमाह—श्रुत्वेत्यादिभिः । यथावदभिभाषितं हनुमतो वाक्यं श्रुत्वा प्रीतिसमायुक्तो रामः उत्तरं वाक्यमब्रवीत् ॥ १ ॥

### भूषणटीका ।

आम्नायं शठकोपदेशिकवरं प्राचार्यपारम्परी-
मप्यानम्य सनारदं कुशलवाचार्यं मुनीनां वरम् ।
पूर्वाचार्यकृता विलोक्य बहुधा व्याख्याः सतां प्रीतये
कुर्वे संप्रति युद्धकाण्डविवृतिं श्रीमत्किरीटाभिधाम् ॥ १ ॥

उक्तं पुरुषकारभूताया लक्ष्म्याः कृत्यं सुन्दरकाण्डे । अथोपायकृत्यं वक्तुं षष्ठः काण्ड आरभ्यते । तत्र स्वामिना कृतकार्ये भृत्ये एवं वर्तितव्यमित्यमुमर्थमुपदेष्टुं सुग्रीवादीनामुत्साहं वर्धयन् समाहृतसीतावृत्तान्तं हनुमन्तं रामः सत्करोति प्रथमे सर्गे । अत्र गायत्र्यक्षरं मकारः । श्रुत्वेति । यथावत् यथावस्थितप्रकारेण । अभिभाषितम् उक्तम् । उत्तरं प्रियश्रवणोत्तरकालार्हम् ॥ १ ॥

प्रविवेश महातेजाः सुकृतां विश्वकर्मणा । तस्याः स वैदूर्यमयं प्रियकाजिनसंवृतम् ॥ १६ ॥
महत्सोपाश्रयं भेजे रावणः परमासनम् । ततः शशासेश्वरवद्दूताँल्लघुपराक्रमान् ॥ १७ ॥
समानयत मे क्षिप्रमिहैतान्राक्षसानिति । कृत्यमस्ति महज्जाने कर्तव्यमिति शत्रुभिः ॥ १८ ॥
राक्षसास्तद्वचः श्रुत्वा लङ्कायां परिचक्रमुः । अनुगेहमवस्थाय विहारशयनेषु च ॥
उद्यानेषु च रक्षांसि चोदयन्तो ह्यभीतवत् ॥ ॥ १९ ॥
ते रथान्तचरा एके दृप्तानेके दृढान्हयान् । नागानेकेऽधिरुरुहुर्जग्मुश्चैके पदातयः ॥ २० ॥
सा पुरी परमाकीर्णा रथकुञ्जरवाजिभिः । संपतद्भिर्विरुरुचे गरुत्मद्भिरिवाम्बरम् ॥ २१ ॥
ते वाहनान्यवस्थाय यानानि विविधानि च । सभां पद्भिः प्रविविशुः सिंहा गिरिगुहामिव ॥ २२ ॥

---

रा० टी०—सुवर्णेति । सुवर्णरजतैः आस्तीर्णां तन्निर्मितभूमिमतीमित्यर्थः विशुद्धाः स्फटिकाः तन्मयप्रतिमादयः अन्तरे मध्ये यस्या रुक्मपट्टः उत्तरच्छदो यस्यां पङ्क्तिः पिशाचशतैरभिरक्षितां विश्वकर्मणा सुकृतां तां सभां वपुषा विराजमानो रावणः प्रविवेश श्लोकद्वयमेकान्वयि ॥ १५ ॥ १६ ॥

गो० टी०—सुवर्णेत्यादिश्लोकद्वयमेकान्वयम् । विशुद्धस्फटिकान्तरां निर्मलस्फटिकनिर्मितमध्यप्रदेशाम् रुक्मपट्टोत्तरच्छदां कनकमयपट्टवस्त्रास्तरणाम् ॥ १५ ॥ १६ ॥

१६ ] ति० टी०—तस्याः सभाया मध्ये स रावणः वैदूर्यमयं वैदूर्यरत्ननिर्मितम् प्रियकाख्यमृगसंबन्धिना परममृदुनाजिनेन संवृतम् ॥ १६ ॥

रा० टी०—तस्या इति । वैदूर्यमयं वैदूर्यमणिनिर्मितं प्रियकाणाम् अतिमृदुचर्मवत्प्रियकाभिधमृगाणामजिनेन संवृतं सोपाश्रयम् उपधानसहितं तस्याः सभायाः परमासनं रावणो भेजे तत्र तस्थौ ॥ १६ ॥

गो० टी०—तस्यामिति । वैदूर्यमयं वैदूर्यप्रचुरम् प्रियकाजिनसंवृत्तं प्रियकमृगस्याजिनेन संवृतम् प्रियको लोमभिर्युक्तो मृदुचमसृणैर्घनैरिति वैजयन्ती । सोपाश्रयं सावष्टम्भम् सोपधानमिति यावत् ॥ १७ ॥

१७ ] ति० टी०—सोपाश्रयं सोपधानम् ईश्वरवदीश्वरार्हम् ॥ १७ ॥

१८ ] ति० टी०—शत्रुभिर्महत्कृतं कर्तव्यमस्तीति जाने, अतो राक्षसान्समानयतेति शशास ॥ १८ ॥

रा० टी०—तत इति । शत्रुभिः सह महत् कृत्यं कार्यं कर्तव्यमस्ति इत्यहं जाने अतः एतान् प्रसिद्धान् राक्षसान् क्षिप्रमिहानयत इति लघुपराक्रमान् दूतान् ईश्वरवत् शशास सार्धश्लोक एकान्वयी ॥ ७१ ॥ १८ ॥

गो० टी०—तत इति । ईश्वरवत् राजार्हम् इह सभायाम् एतान् एतन्नगरस्थान् इति शशासेत्यन्वयः तमेव प्रकारमाह—कृत्यमित्यर्थेन । महद्यथा तथा समर्थ्यं यत्नेन निर्वाह्यं जातं प्राप्तं महत्कृत्यमस्तीति शशास । महद्भ्यो रामादिभ्यो जातमिति वा । महदित्यनेन तदानीं चारमुखेन रामादेः समुद्रतीरगमनं रावणो ज्ञातवानिति गम्यते ॥ १८ ॥ १९ ॥

१९ ] ति० टी०—राक्षसा दूतरूपाः । अनुगेहमवस्थाय प्रविश्य विहारादिषु व्यासक्तान्यपि रक्षांसि रावणाज्ञयाभीतवत्तदर्थं चोदयन्तः सन्तो लङ्कायां परिचक्रमुः ॥ १९ ॥

रा० टी०—राक्षसा इति । तद्वचः श्रुत्वा अनुगेहं निखिलगृहेषु उद्यानेषु च अवस्थाय विहारसैन्येषु आसक्तानि रक्षांसि अभीतवत् यथा भवति तथा चोदयन्तः सहगमनाय प्रेरयन्तो राक्षसाः लङ्कायां परिचक्रमुः सार्धश्लोक एकान्वयी १९

गो० टी०—राक्षसा इत्यादि सार्धश्लोकः । विहरमाणानीति शेषः । विहारो विहारस्थलम् विहारादिषु आस्थाय विहरमाणानि रक्षांसि अभीतवत् अभीताः चोदयन्तः चोदनार्थं लङ्कायामनुगेहं परिचक्रमुरित्यन्वयः ॥ २० ॥

२० ] ति० टी०—ते आहूता राक्षसा रथान्तचरा रथश्रेष्ठसंचारिणः । जग्मुरिति शेषः । हयानित्यत्राधिरुरुहुरित्यपकर्षः ॥ २० ॥

रा० टी०—ते इति । ते आहूताः एके राक्षसाः रथान्तचराः रथश्रेष्ठसंचारिणः सन्तः एके पदातय एव जग्मुः एके हयान् एके नागान् गजान् आरुरुहुः ॥ २० ॥

गो० टी०—ते रथान् रुचिरानेके दृप्तानेके पृथग्घयान् । नागानन्येऽधिरुरुहुर्जग्मुश्चैके पदातयः ॥ २१ ॥

२१–२२ ] ति० टी०—परमाकीर्णा ॥ २१ ॥ २२ ॥

रा० टी०—सेति । रथादिभिः परमाकीर्णा सा लङ्का गरुत्मद्भिराकीर्णमम्बरमिव रुरुचे शुशुभे ॥ २१ ॥

गो० टी०—सेति । गरुत्मद्भिः पक्षिभिः ॥ २२ ॥

रा० टी०—ते इति । ते राक्षसाः वाहनानि गजादीन् यानानि रथादीन् च अवस्थाप्य बहिरिति शेषः सिंहाः गिरिगुहामिव पद्भिः सभां प्रविविशुः ॥ २२ ॥

गो० टी०—त इति । वाहनानि शिबिकादीनि । यानानि अश्वादीनि अवस्थाप्य बहिर्निक्षिप्य ॥ २३ ॥

---

१ तस्यां तु वैदूर्यमिति गो. पाठः । २ जातं समर्थ्यमिह नो महदिति गो. पाठः । ३ रथान्रुचिरानिति गो. पाठः । ४ पृथगिति गो. पाठः । ५ अन्ये इति गो. पाठः । ६ स्थाप्येति गो. रा. पाठः ।

श्रीवाल्मीकिमहामुनिप्रणीतं

# रामायणम्

रामप्रणीत-रामायणतिलक, शिवसहायप्रणीत-रामायणशिरोमणि,
गोविन्दराजप्रणीत-रामायणभूषणेति टीकात्रयेणोपस्कृतम्।

तच्च

कट्टिभिः श्रीनिवासशास्त्रिभिः संशोधितपाठान्तरैः टिप्पण्यादिभिश्च समलंकृतम्।

राष्ट्रिय-संस्कृत-संस्थान
नई दिल्ली

पुस्तकमिदं राष्ट्रियसंस्कृतसंस्थानस्य पुनर्मुद्रणयोजनायां प्रकाशितम्।

श्रीवाल्मीकिमहामुनिप्रणीतं

# रामायणम्

रामप्रणीत-रामायणतिलक, शिवसहायप्रणीत-रामायणशिरोमणि, गोविन्दराजप्रणीत-रामायणभूषणेति टीकात्रयेणोपस्कृतम्।

तच्च

कट्टिभिः श्रीनिवासशास्त्रिभिः संशोधितपाठान्तरैः टिप्पण्यादिभिश्च समलंकृतम्।

तथा

सातकडिमुखोपाध्यायशर्मणा विनिर्मिता विशदभूमिकया श्लोकानुक्रमण्या च सनाथीकृतम्

## सप्तमो भागः

## उत्तरकाण्डम्

## श्लोकानुक्रमणिका

राष्ट्रिय-संस्कृत-संस्थान
मानित विश्वविद्यालय
५६-५७, इन्स्टीट्यूशनल एरिया,
जनकपुरी, नई दिल्ली-११००५८

॥ श्रीः ॥

आदिकविश्रीवाल्मीकिमहामुनिप्रणीतम्

# रामायणम् ।

तिलक–रामायणशिरोमणि–गोविन्दराजीय(भूषणं)ति-
टीकात्रयसमलंकृतम्

## उत्तरकाण्डम् ।

### प्रथमः सर्गः ।

श्रीरामं विजयिनं श्रुत्वा प्रहृष्टानामभिनन्दितुकामानां चतुर्दिग्वासिनामृषीणामयोध्यायामागमनम् । रावणादिवधतुष्टानपि विशेषत इन्द्रजिद्वतिविस्मितान्मुनीन्प्रतीन्द्रजिच्चरित्रश्रवणे सकुतूहलं रामस्य प्रश्नः ।

**प्राप्तराज्यस्य रामस्य राक्षसानां वधे कृते । आजग्मुर्मुनयः सर्वे राघवं प्रतिनन्दितुम् ॥ १ ॥**

#### तिलकटीका ।

उत्तरे नूत्तरं कार्यं कृत्वायोध्यां निजे पदे ।
स्थापयित्वा स्वयं रेजे रामो नः कुलदैवतम् ॥

१] अथ रावणस्य ब्रह्मानुग्रहजबलवैभवप्रतिपादनद्वारा तज्जेतृत्वेन भगवति पराक्रमातिशयं प्रतिपादयितुं त्वदस्त्रवैभवं त्वयैवोपसंहृतमिति भगवन्महिमानं च स्तोतुमृषय आगता इत्याह–प्राप्तेति । राक्षसानां वधे कृतेऽनन्तरं प्राप्तराज्यस्य प्राप्तराज्याभिषेकस्य समीपं मुनय आजग्मुः । किमर्थम् । राघवं प्रतिनन्दितुम् । तद्वैभवमभिष्टोतुमित्यर्थः ॥ १ ॥

#### रामायणशिरोमणिः ।

स्वस्ति श्रीसदयं जितरिपुमभयं शरणदमुनयं नृपनृपतिम्
सीतापुलशयनं पङ्कजनयनं कृतसलिलचयनं दीनगतिम्
वन्दे श्रीरामं परमभिरामं जलदश्यामं मुकुटधरम्
सीताकरकरकं मनसिजहरकं श्रितसुखपरकं सकलवरम् ॥१॥
वन्दे रणधीरं श्रीमहावीरं सुमितसमीरं पवनसुतम्
परसेनानिघ्नं परकृतिविघ्नं भुवने विततं वीरनुतम्
जयति श्रीगङ्गा दुरितनिभङ्गा यमुनासङ्गा गिरा युता
यज्ञाग्निनिवासी सुखसुखभासी परप्रकाशी जह्नुसुता ॥ २ ॥
श्रीभारद्वाजो जयति विराजो मुनिगणराजो यस्य गुरुः
कर्म्माकंप्रसृतो नित्यं पूतो जितयमदूतो भक्तगुरुः
रामायणकर्ता संसृतिहर्ता दुःखविदस्तः दयानिधिम्
वन्दे गुरुमीशं सकलसुधीशं कृतपृथिवीशं धर्मविधिम् ॥ ३ ॥
कृत्वारसकाण्डे श्रुतिरसभाण्डे सद्ब्रह्माण्डे विदिततमे
रामायणतिलकं तत्त्वनिमिलकं हतहद्बिलकं सुखपरमे
कुर्मः श्रुतिसारं श्रीविस्तारं श्रितजनतारं शिरोमणिम्
मत्सररतिकारं हतभवभारं स्वन्धविदारं व द्युमणिम् ॥ ४ ॥

षड्भिः काण्डैः राज्याभिषेकपर्यन्तं रामचरितं संवर्ण्योत्तरवृत्तान्तं वर्णयितुमुत्तरकाण्ड आरभ्यते तत्र प्रथमे सर्गे ऋषीणामागमनं वर्णयन्नाह—प्राप्तेत्यादिभिः । राक्षसानां वधे कृते सति सर्वे मुनयो राघवं प्रतिनन्दितुं प्राप्तराज्यस्य रामस्य समीपमाजग्मुः ॥ १ ॥

#### भूषणटीका ।

श्रीमद्वत्सकुलप्रदीपशठजित्पादारविन्दद्वयी—
सेवालब्धसमस्तशास्त्रविततिर्गोविन्दराजाह्वयः ।
श्रीरामायणभूषणेऽत्र मुकुटीभूतां परामुत्तरं
ग्रन्थं व्याकृतिमातनोति विदुषां प्रीतिः पुनर्वर्धताम् ॥१॥

प्राप्तेत्यादि । राक्षसानां वधे कृते सति प्राप्तराज्यस्य रामस्य अनादरे षष्ठी प्राप्तराज्यं राममनादृत्य राघवं लक्ष्मणं प्रतिनन्दितुं सर्वे ऋषय आजग्मुः । प्राधान्येनेन्द्रजिद्वधं प्रशंसिष्यन्ति रामस्य समीप इति शेष इत्येके । अत्र प्रति गायत्र्याः एकत्रिंशाक्षरम् ॥ १ ॥ २ ॥

पश्य तावन्महाबाहो राक्षसेश्वर मानुषम् । मूढमेवं विचित्रार्थं यस्य न ज्ञायते गतिः ॥ १२ ॥
क्वचिद्वादित्रनृत्यादि सेव्यते मुदितैर्जनैः । रुद्यते चापरैरार्तैर्धाराश्रुनयनाननैः ॥ १३ ॥
मातापितृसुतस्नेहभार्याबन्धुमनोरमैः । मोहितोऽयं जनो ध्वस्तः क्लेशं स्वं नावबुध्यते ॥ १४ ॥
तत्किमेवं परिक्लिश्य लोकं मोहनिराकृतम् । जित एव त्वया सौम्य मर्त्यलोको न संशयः ॥ १५ ॥
अवश्यमेभिः सर्वैश्च गन्तव्यं यमसादनम् । तन्निगृह्णीष्व पौलस्त्य यमं परपुरंजय ॥ १६ ॥
तस्मिञ्जिते जितं सर्वं भवत्येव न संशयः । एवमुक्तस्तु लङ्केशो दीप्यमानं स्वतेजसा ॥ १७ ॥
अब्रवीन्नारदं तत्र संप्रहस्याभिवाद्य च । महर्षे देवगन्धर्वविहार समरप्रिय ॥ १८ ॥
अहं समुद्यतो गन्तुं विजयार्थं रसातलम् । ततो लोकत्रयं जित्वा स्थाप्य नागान्सुरान्वशे ॥
समुद्रममृतार्थं च मथिष्यामि रसालयम् ॥ ॥ १९ ॥
अथाब्रवीद्दशग्रीवं नारदो भगवानृषिः । क्व खल्विदानीं मार्गेण त्वयेहान्येन गम्यते ॥ २० ॥
अयं खलु सुदुर्गम्यः प्रेतराजपुरं प्रति । मार्गो गच्छति दुर्धर्ष यमस्यामित्रकर्शन ॥ २१ ॥

---

गो० टी०–किं च मृतमारणवद्बुद्धेन तेषां वधो व्यर्थ इत्याह–क्षीयमाणमिति ॥ ११-१२ ॥

१२ ] ति० टी०–यस्य मनुष्यलोकस्य गतिर्दुःखादिभोगकालो न ज्ञायते तेन लोकेनेति शेषः । एवं ज्ञानराहित्येन मूढमपि विचित्रार्थं नानाविधक्षुद्रपुरुषार्थसक्तं मानुषं लोकं पश्य ॥ १२ ॥

रा० टी०–पश्येति । यस्य गतिः अवस्थितिर्न ज्ञायते तं मानुषं लोकं विचित्रार्थमनेकविधाधिव्याधिविशिष्टं पश्य जानीहि १२

१३ ] ति० टी०–तदेवाह–क्वचिदिति । धाराश्रुनयनोपेतमाननं येषां तैः ॥ १३ ॥

रा० टी०–क्वचिदिति । क्वचित् कदाचित् मुदितैर्जनैर्वादित्रनृत्यादि सेव्यते धाराश्रुभिः अश्रुधाराभिरुपलक्षितैर्नयनैर्युक्तमाननं येषां तैरपरै रुद्यते ॥ १३ ॥

गो० टी०–क्वचिदिति–धाराश्रुनयनाननैः धाराभूताश्रुनयनयुक्तमुखैः ॥ १३ ॥

१४ ] ति० टी०–मात्रादिस्नेहैर्भार्यादिमनोरमैः । भार्यादिविषयकमनोरथैरित्यर्थः । मोहितः, अत एव ध्वस्तोऽयः पतितः । स्वं क्लेशं पारलौकिकम् ॥ १४ ॥

रा० टी०–मातेति । मात्रादिस्नेहैः भार्याबन्धुषु मनोरमैः अनेकविधमनोरथैर्मोहितः अत एव ध्वस्तोयं जनः स्वं क्लेशं नावबुध्यते ॥ १४ ॥

गो० टी०–मातेति—भार्याबन्धुमनोरमैः भार्याबन्धुषु मनोरमो मनोरमणं प्रीतिर्येषां तैः क्लेशं पारलौकिकदुःखम् ॥ १४ ॥

१५-१७ ] ति० टी०–एवंप्रकारेण मोहेनाज्ञानेन निराकृतं प्रच्यावितार्थम् ॥ १५-१७ ॥

रा० टी०–तदिति । त्वया मर्त्यलोको जित एव उत्तमानां जये तदधमाः जितप्राया एवेत्यर्थः तत्तस्मात् हेतोः मोहनिराकृतं लोकं परिक्लिश्य किं न किमपीत्यर्थः ॥ १५ ॥

रा० टी०–अवश्यमिति । सर्वैर्यमसादनमवश्यं गन्तव्यं यम एव सर्वेभ्यः प्रबल इत्यर्थः अतो यमं निगृह्णीष्व तस्मिन् जिते सति सर्वं जितं भवति भविष्यति सार्द्धश्लोक एकान्वयी ॥ १६ ॥

रा० टी०–एवमिति । एवमुक्तो लंकेशो नारदमब्रवीत् १७

गो० टी०–अलमेनं परिक्लिश्येति—मोहनिराकृतः अज्ञानेन प्रच्यावितार्थः ॥ १५-१७ ॥

१८ ] ति० टी०–देवगन्धर्वविहार तल्लोकक्रीडापर, समरप्रिय समरदर्शनप्रिय ॥ १८ ॥

रा० टी०–तदाकारमाह–महर्षे इति । देवगन्धर्वाणां विहारः विहरणमिव तत्सम्बोधनं विजयार्थं रसातलं गन्तुमहं समुद्यतोस्मि ॥ १८ ॥

गो० टी०–महर्षे इति–देवगन्धर्वविहार देवगन्धर्वैर्गानपरैर्विहारपर । समरप्रिय समरदर्शनप्रिय ॥ १८ ॥

१९ ] ति० टी०– ततो रसातलजयानन्तरम् । रसस्यामृतरूपरसस्यालयं समुद्रं मथिष्यामि ॥ १९ ॥

रा० टी०–तत इति । नागान्सुरांश्च वशे आस्थाप्य अमृतार्थं रसालयं रसानामाश्रयं समुद्रं मथिष्यामि ॥ १९ ॥

गो० टी०–तत इति–रसालयम् अमृतरसालयम् । खल्विति ॥ १९ ॥

२० ] ति० टी०–इदानीं रसातलं जिगमिषुणा त्वयान्येन मार्गेण रसातलमार्गव्यतिरिक्तमार्गेण क्व खलु गम्यते ॥ २० ॥

रा० टी०–अथेति । नारदो दशग्रीवमब्रवीत् तदाकारमाह अन्येन मार्गेण त्वया क्व खलु किमर्थं गम्यते यमराजपुरमार्गेणैव गम्यतामित्यर्थः ॥ २० ॥

गो० टी०–अथेति–इदानीं रसातलजिगमिषुणा त्वया अन्येन मार्गेण रसातलमार्गव्यतिरिक्तमार्गेण क्व गम्यते ॥ २० ॥

२१ ] ति० टी०–कस्य देशस्य तर्ह्ययं मार्गोऽत आह–अयं खल्विति । सुदुर्गम्यः सुदुर्गमः । यदार्थः । यमस्य यमपुरस्य ॥ २१ ॥

---

१ अलमेनमिति गो. पाठः । २ त्वया ह्यन्येति गो. पाठः । ३ दुर्धर्ष इति गो. पाठः ।